We are indebted to the Nepal Government and particularly to Bada Kaji Marichi Man Singh, C. I. E., private secretary to His Highness the Maharajadhiraja Saheb of Nepal for his courtesy in lending the Nepal MS and allowing it to remain with us for a very long time, and for many other favours shown to the Oriental Institute on several occasions. We have also to thank the General Secretary of the Royal Asiatic Society of Bengal, and the Vice-chancellor of the Dacca University for the loan of respective manuscripts of the Saktisaṅgama Tantra in their charge, and for allowing them to remain with us for an indefinitely long period, since the publication of the book was delayed beyond measure due to circumstances beyond control.

Here, it may be repeated that an exhaustive and elaborate introduction of this comprehensive Tantra can only be given when all the four volumes are ready in print. Therefore, it is not necessary at the present moment to refer to the subject matter of the present volume in detail. Nevertheless, it is desirable to make a brief reference to the special features presented by the Sundarī Khaṇḍa.

The most important chapter in the Sundarī Khaṇḍa is undoubtedly the Deśavyavasthāniyama or the "rules relating to the arrangement of countries". This is the seventh chapter (pp. 66–71) which is followed by another chapter describing the Five Divisions (Prasthas) in which India was divided on pp. 72-73. These two chapters are full of geographical information relating to Ancient India.

In the seventh chapter, for instance, the boundaries of the different countries (Deśas) are given, and although many of the names are not to-day very familiar to us, it is not very difficult to understand the limits of the different countries into which India was then divided. As the Śaktisaṅgama Tantra is a product of the 17th Century, we can thus get at least a contemporary picture of India of that time.

The fifty-six countries described in the seventh Paṭala are the following :—

1. Aṅga
2. Vaṅga
3. Kaliṅga
4. Kālinda
5. Kerala–Siddhikerala
6. Hamsa Kerala
7. Sarveśa Kerala
8. Kāśmīra
9. Kāmarūpa
10. Mahārāṣṭra
11. Andhra
12. Saurāṣṭra
13. Tailiṅga
14. Malayāla
15. Karṇāṭa
16. Avanti
17. Vidarbha
18. Maru
19. Ābhira
20. Mālava
21. Cola
22. Pāñcāla
23. Kāmboja
24. Vairāṭa
25. Pāṇḍya
26. Videha
27. Vāhlika
28. Kirāta

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | | | |
|---|---|---|---|
| 29. | Vaktāna | 43. | Hūṇa |
| 30. | Khurāsāna | 44. | Koṅkaṇa |
| 31. | Airaka | 45. | Kaikaya |
| 32. | Bhoṭānta | 46. | Saurasena |
| 33. | Cīna | 47. | Kuru |
| 34. | Mahācīna | 48. | Siṁhala |
| 35. | Nepāla | 49. | Pulinda |
| 36. | Śilahaṭṭa | 50. | Kaccha |
| 37. | Gauḍa | 51. | Matsya |
| 38. | Mahākośala | 52. | Madra |
| 39. | Magadha | 53. | Sauvīra |
| 40. | Kīkaṭa | 54. | Lāṭa |
| 41. | Utkala | 55. | Barbara |
| 42. | Śrīkuntala | 56. | Saindhava |

The division of the country into fifty-six is followed in this Sundarī Khaṇḍa in accordance with the tradition of Sanskrit literature of the gazetteer class, an account of which is given by the late H. P. Shastri in the JBORS, 1918, pp. 14ff. In this article a reference is made to several Sanskrit works such as the Vikramasāgara, Deśāvalīvivṛti, Pāṇḍavadigvijaya, etc. Vidyāpati in his work gives an account of 65 countries instead of the usual 56. Even before this, Rājasekhara (880-920 A.D.) in his Kāvyamimāṁsā gave an account of the various countries, their number being more than 80. Later on, in another work, the Bhāvaprakāśana of Śāradātanaya is stated once more a division of India into 64 countries. Here the author gives the most interesting information that the inhabitants of these sixty-four countries spoke eighteen different dialects. These eighteen, therefore, represent the linguistic division of ancient India. As this information may be of use in a New India, Śāradātanaya's linguistic division of the country into 18 parts is repeated here :—

| | | | |
|---|---|---|---|
| 1. | Dramiḍa | 10. | Pārvatīya |
| 2. | Kannaḍa | 11. | Pāmara |
| 3. | Andhra | 12. | Kaṣa |
| 4. | Hūṇa | 13. | Vardhraka |
| 5. | Himmīra | 14. | Kāmboja |
| 6. | Simhala | 15. | Saka |
| 7. | Pallava | 16. | Nagna |
| 8. | Yavana | 17. | Vākaṭa |
| 9. | Jaina | 18. | Koṅkaṇa. |

For fuller details a reference may be made to the printed work of Śāradātanaya in the Gaekwad's Oriental Series as No. XLV (intro. pp. 61-62) edited in an excellent manner by our esteemed colleague Pandit Ramaswami Shastri Shiromani.

In the eighth paṭala of the present book, an account of the division of India into five provinces is recorded. This is an excellent division of the country according to directions or in Prasthas. The five Prasthas (divisions) are called the Indraprastha, Yamaprastha,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Varuṇaprastha, Kūrmaprastha and the Devaprastha. The name of Indra stands for the eastern direction and, therefore, the eastern division of the then India according to the Sundarī Khaṇḍa is bounded by Yoginīpura (Delhi) in the north, Gadāvarta in the south, Mathurā in the east and Dvarakā in the west. This is the country of the Aśvapati.

The second division is called Yamaprastha. As Yama stands for the southern direction, Yamaprastha is the southern division bounded by Someśvara in the west, Saptaśṛṅgī in the east, Māyāpura in the north and Vyaṅkaṭeśa in the south. This is the country of the Narapati.

The third is the Varuṇaprastha. Varuṇa stands for the west, and this division represents the western division of India. The lord of Macca is in the west, Hiṅgula is in the north, and Trailokyavijaya is towards the right. Here is situated the country called the Rājāvarta at the mouth of the river Sītā which is generally identified with a trans-Himalayan river.

The fourth division of India is named in the Sundarī Khaṇḍa as the Kūrmaprastha. As the position of the Kūrma in the Kūrmacakra of the world is in the centre, this Prastha should be taken as the central division. It is bounded by Gokarṇa in the south, Kāmākhyā in the east, Mānasa in the north, and Śāradā in the west.

The fifth division is named here as the Devaprastha. As the Devas reside in the north this is to be taken as the northern division of the country. It is bounded by Śriraṅga in the south, Gāyatri in the west, Jagannātha in the east, and Amarakaṇṭaka in the north.

Although the divisions are clear cut in the Sundarī Khaṇḍa it is difficult to understand the limits of each of these divisions. But it is interesting to note that the country used to be divided in five grand divisions which are natural according to directions. In the India of the future this division into five provinces can be easily adopted according to direction for the convenience of control and administration.

The Sundarīkhaṇḍa is replete with information on several peculiar groups of Tāntric deities whose iconography also it describes. One such group is that of the fifteen Nityā deities whose mantras, iconography and purpose are minutely stated in this work. These Nityā deities are named here as:—

1. Kālī
2. Kapālinī
3. Kullā
4. Kurukullā
5. Virodhinī
6. Vipracittā
7. Ugrā
8. Ugraprabhā
9. Dīpta
10. Nīlā
11. Ghanā
12. Balākā
13. Mātrā
14. Mudrā
15. Mitā

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The first among them is Kalī Nityā and her mantra as given in a marginal note in the "D" MS is:—

ओँ ह्रीं कालि कालि महाकालि
कौमारि मह्यं देहि स्वाहा ।

Her dhyāna or form is given in the text as follows:—

श्यामवर्णा महाभीमा घोररावा करालिनी ।
मुण्डमालाविभूषाढ्या दक्षे खड्गं प्रविभ्रती ।
तर्जनीं धारयन् वामे नृत्यन्ती प्रेतभूमिषु ॥

From the above Dhyāna the iconography of Kalī Nityā becomes evident. She is dark in colour, ferocious in appearance with a garland of skulls round her neck.. She wields the sword in her right hand, while the left shows the Tarjanī and she dances on the cremation ground. This makes her different from the Hindu deity Kāli who is usually four-armed. By the worship of Kālī Nityā one becomes invested with Lakṣmī and his fame spreads as he is universally honoured.

The second Nityā in the series is Kapālinī whose mantra is restored according to the 'D' MS as:—

ओँ ह्री क्रीँ कपालिनि महाकपालप्रियमानसे कपालसिद्धिं मे देहि हूँ फट् स्वाहा ।

Her iconography is given in the Dhyāna that follows:—

ध्यायेदञ्जनपुञ्जाभामापीनस्तनयुग्मकाम् ।
चन्द्रवक्त्रां च बिम्बौष्ठीं मुक्तकेशीं दिगम्बराम् ॥
चतुर्मुण्डोपरिगतां शङ्खकङ्कणभूषिताम् ।
खड्गत्रिशूलवरदाभयान् हस्तचतुष्टये ॥

Kapālinī is black in colour. She is nude, with dishevelled hair, and sits on a seat composed of four severed heads. She exhibits the sword, the trident, the Varada and Abhaya Mudrās.

The third Nityā in the group is Kullā. She is called Kullukā because her Vidyā is worshipped by the Kaulas. The mantra of Kullā is composed of seven letters only, and these are:—

ओँ क्रीँ कुल्लायै नमः ।

Her iconography is given in the text as:—

चतुर्भुजां त्रिनयनां मुकुटाटोपमण्डिताम् ।
शवासनगतां कुल्लां दशमुण्डोपरिस्थिताम् ।
वराभयौ करे वामे पुस्तस्त्रग् दक्षिणे करे ॥

According to the dhyāna Kullā is four-armed and sits on ten severed heads on a corpse. She shows the Varada and Abhaya Mudrās in her two left hands and the book and the rosary in the two right.

ii

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The fourth Nityā deity in order is Kurukullā who is well-known in the Buddhist Pantheon as an emanation of the Dhyāni Buddha Amitābha. Here, however, the Sundarī Khaṇḍa gives a different explanation. The text says:—

विद्यानां कुलपूज्यत्वात् कुल्लुका कुल्लुकाधिका ।
कुल्लाया अपि पूज्यत्वात् कुरुकुल्ला महोदया ॥

That is to say that as the Tāntric Vidyās or mantras are worshipped by the Kaulas or Tāntric groups she is called Kullukā or the great Kullukā, and as this Nityā is worshipped by Kullukā even, she is known as Kurukullā. To say the least, this explanation is hardly convincing.

The mantra of Kurukullā may be restored as follows in accordance with the marginal notes contained in the MS 'D'. It is:—

क्रीँ ओँ कुरुकुल्ले क्रीँ ह्रीँ मम सर्वजनवशमानय क्रीँ कुरुकुल्ले ह्रीँ स्वाहा ।

The dhyāna of the deity as given in the Sundarī Khaṇḍa is as follows:—

ततो ध्यायेन्महाविद्यां कुरुकुल्लां कुलेश्वरीम् ।
शवोपरि समासीनां मुण्डमालाविभूषिताम् ।
कपालकर्त्तृकाहस्तां खड्गखेटकधारिणीम् ।
अञ्जनाद्रिनिभां दिव्यां मुक्तकेशीं चतुर्भुजाम् ॥

Kurukullā according to the dhyāna cited above should be conceived as of dark complexion, sitting on a corpse, and as wearing a garland of severed heads. She carries in her four hands the Kapāla and the Kartri and the sword and the Kheṭaka (shield).

The next Nityā is known as Virodhinī and her mantra may be restored as follows in accordance with a marginal note contained in the MS. 'D':—

ओँ क्रीँ ह्री क्लीँ हूँ विरोधिनी शत्रूनुच्चाटय विरोधय विरोधय शत्रुक्षयकरी हूँ फट् ।

The dhyāna of Virodhinī as given in the Sundari Khaṇḍa may be briefly stated as under:—

चतुर्भुजां त्रिनयनां शवपद्मोपरिस्थिताम् ।
त्रिशिखं नागपाशं च घण्टां च डमरुं तथा ।
संबिभ्रतीं महादेवीं क्रमाद्भुजचतुष्टये ॥

Virodhinī should be conceived as a fierce deity with three eyes, and four arms holding a trident (Triśikha), serpent (nā noosegapāśa), the bell and the kettle drum. Apparently, Virodhinī is remembered when one is confronted with many powerful enemies.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The next Nityā in order is Vipracittā, and her mantra may be restored as follows in accordance with directions contained in the MS 'D':—

ओँ श्रीँ क्लीँ चामुण्डे विप्रचित्ते दुष्टघातिनि शत्रून्नाशय एतद्दिनावधि प्रिये सिद्धिं मे देहि हूँ फट् स्वाहा ।

The dhyāna of Vipracittā is given here in brief:—

चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ।
दिगम्बरां मुक्तकेशीं ललज्जिह्वां भयानकाम् ।
भीमदंष्ट्रां करालास्यां सृक्किणीरक्तवाहिनीम् ।
खड्गमुण्डकपालत्रिशूलहस्तां महोदरीम् ।

Vipracittā should be conceived as three-eyed and four-armed carrying the sword, the severed head, the skull cup and the trident. She shows bare fangs and from the two ends of her mouth flows blood. She is reputed to kill or destroy enemies within a specified time.

The next Nityā is Ugrā. According to the 'D' MS she has a seven lettered mantra restored as follows:—

ओँ स्त्रीँ हूँ ह्रीँ हूँ फट् ।

The dhyāna of Ugrā is given in the Tantra and it is given here in brief:—

ततो ध्यायेत् परामुग्रां प्रत्यालीढपदस्थिताम् ।
चतुर्भुजां त्रिनयनां मुण्डमालाविभूषिताम् ।
श्यामवर्णां मुक्तकेशीं खड्गेन्दीवरधारिणीम् ।
कपालकर्तृकाहस्तां वरदानपरायणाम् ॥

According to this dhyāna the form of Ugrā should be conceived as fierce, and awe-inspiring with legs arranged in the Pratyālīḍha attitude, a garland of severed heads round her neck and with dishevelled hair. She is dark in colour and in her four hands she carries the sword, the night lotus, the skull cup and the knife. She is worshipped for the fulfilment of all varieties of desires. She resembles in major details the Buddhist deity Ugratārā.

The next Nityā is Ugraprabhā. Her mantra consists of 25 syllables and is restored in 'D' as follows:—

ओँ ग्लूँ ग्लूँ उग्रप्रभे देवि काली महादेवि स्वरूपं दर्शय हूँ फट् स्वाहा ।

The dhyāna of Ugraprabhā is here given in brief:—

चतुर्भुजां त्रिनयनां शवपद्मोपरिस्थिताम् ।
सुप्रसन्नमुखाम्भोजां शवमांसप्रभोजनीम् ।
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम ।
खड्गमुण्डधरां वामे दक्षे खर्परकर्त्तृके ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

According to the dhyāna Ugraprabhā should be conceived as four-armed and three-eyed, sitting on the lotus on a corpse. She is of pleasant expression, and is represented as devouring carrion and as wearing a girdle (Kāñci) composed of the severed hands of corpses. She wields in her hands the sword, and the severed head in the two left and the skull cup and the knife in the two right. It is said that all kinds of supernormal powers can be obtained by propitiating the goddess.

The next Nityā is called Dīptā and her mantra is composed of nineteen syllables only. The MS 'D' gives the mantra as follows:—

ओँ क्रीँ हूँ दीप्तायै सर्वमन्त्रफलदायै हूँ फट् स्वाहा ।

The dhyāna given in the Sundarī Khaṇḍa gives her iconography. It is briefly stated below:—

चतुर्भुजां त्रिनयनां मुण्डमालाविभूषिताम् ।
शवपद्मे समासीनां पीनोन्नतपयोधराम् ।
शवास्थिकृतकेयूरशङ्खकङ्कणभूषिताम् ।
खड्गमुण्डधरां वामे सव्येऽभयवरप्रदाम् ।

Dīptā is also a fierce deity with three eyes and four arms. She wears a garland of severed heads. Her armlet is made of human bones and her bracelet is prepared from conch shell. She carries the sword and the severed head in the two left hands and exhibits the Abhaya and Varada mudrās in the two right. By worshipping her one can obtain omniscience, and can be highly learned even without reading.

The next Nityā is Nīlā, also called Mahānīlā and Mahānīla-Sarasvatī. Her mantra is given in the Sundarī Khaṇḍa as follows:—

कूर्चयुग्मं महादेवि कालीबीजद्वयं तथा
मायाद्वयं समुद्धृत्य हसबलमरी स्वरूपकम्
अथ नीलपताके च हूँ फडन्ता महेश्वरि ।

Now, this is the verse which contains the mantra of Nīlā. In this verse *Kūrca* stands for the letter *Hūṁ*, *Kālī* represents *Krīṁ* and *Māyā* denotes the letter *Hrīṁ*. Therefore, the full mantra following the MS 'D' is restored as follows:—

हूँ हूँ क्रीँ क्रीँ ह्रीँ ह्रीँ हसबलमरी नीलपताके हूँ फट् ।

According to the dhyāna her appearance is terrible with a garland of severed heads. eyes red and rolling, protruding tongue, ornaments made of human flesh and bones, and the seat of the corpse. Her worship confers wealth, wisdom and erudition.

The next Nityā in order is Ghanā. Her mantra of fourteen letters is restored in 'D' as follows:—

ओँ क्लीँ ओँ घनालये घनालये ह्रीँ हूँ फट् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The iconography of Ghanā Nityā is known from the dhyāna describing her form. According to this description Ghanā is four-armed, three-eyed and fierce in appearence. She is dark in colour, nude and from the corner of her lips flows a stream of blood. She wears a girdle made up of severed hands of corpses. She holds in her four hands the sword, the shield (Kheṭaka), the spear (paṭṭiśa) and the club (mudgara). The eight great Siddhis are obtained by her worship.

The next Nityā is Balākā who is the twelfth in rank. The Mantra is restored in MS 'D' as.

ओँ क्रीँ हूँ ह्रीँ बलाकाकालि अत्यद्भुतपराक्रमे अभीष्टसिद्धिं मे देहि हूँ फट् स्वाहा।

The form of Balākā is described in this book. She should be of dark complexion, four-armed and three-eyed. She should be conceived as residings in a fort constructed of human skulls, and as nude. She wears a girdle composed of severed hands of corpses, and her hair is dishevelled. She holds in her hands the sword and the severed head in the left, and the skull cup and the raised index finger in the right. Balākā is said to have the different Vidyās under her control.

The thirteenth Nityā is Mātrā and she is resided in the mantra which may be restored as follows according to the MS 'D':—

ओँ क्रीँ ह्रीँ हूँ ऐँ १० महामात्रे सिद्धिं मे देहि सत्वरं हूँ फट् स्वाहा।

According to the dhyāna she sits on the chest of a corpse, is fierce in appearance, is three-eyed and four-armed carrying the skull cup, the knife, the sword and the severed head.

The fourteenth Nityā in the series is known as Mudrā Nityā and her mantra may be restored from the text as follows in accordance with the MS 'D':—

ओँ क्रीँ ह्रीँ हूँ प्रीँ फ्रेँ मुद्राम्बा मुद्रासिद्धिं मे देहि भो जगन्मुद्रास्वरूपिणी हूँ फट् स्वाहा।

The dhyāna describes her to be a fierce deity with the garland of heads, girdle of severed hands, blood trickling down her lips. She hold in her four hands the skull cup, the knife, the sword and the shield (Kheṭaka). When propitiated, she confers wealth, emancipation, freedom from fear and victory.

The fifteenth or the last Nityā in the series is called Mitā. Her mantra may be restored as follows:—

ओँ क्रीँ हूँ ह्रीँ ऐँ मिते पारमिते पराक्रमाय ओँ क्री हूँ ह्री ऐ सोऽहं हूँ फट् स्वाहा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The form of Mitā, in harmony with the other Nityā deities, is terrible to the extreme. She has dark blue complexion, and wears red garments. She sits on a corpse, wears a garland of heads, and has dishevelled hair. She is four-armed and holds the sword and the severed head in the left and exhibits the Abhaya and Varada mudrās in the two right hands.

Beyond this group of 15 Nityā deities various other interesting gods and goddesses are described in this volume, and their method of worship and the results to be obtained therefrom are stated herein with meticulous care. One of the deities is Tiraskaraṇī whose worship confers on the worshipper the power to disappear at will, or making ordinary people blind in respect of his own body. Another is the deity Svapnavārāhikā whose worship confers power to control crowds and obtain fame and popularity. Sampatsarasvati is another interesting deity whose mantra when potent can confer great wealth to even very poor and indigent persons. The deity Pathiṣad Rudra is another deity of great importance in a country where travelling is always full of danger. If the Vidyā of this deity is recited in travel, the traveller does not meet with any mishap, Ārdrapaṭeśvarī is another Vidyā good for people always troubled by enemies.

The Sundarī Khaṇḍa of the Śaktisaṅgama Tantra is rich in interesting information on the state of Tāntrism during the Moslem rule in India, and throws valuable side-light on the state of the culture and mind of the Hindus including their aspirations, aims, difficulties and achievements.

Baroda, 1st March 1947. B. BHATTACHARYYA.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# विषय सूची


| | | पृष्ठ |
|---|---|---|
| १ | श्रीचक्रयोगादिकथनं नाम प्रथमः | १५ |
| २ | उदयाक्षरनिरूपणं नाम द्वितीयः | २६ |
| ३ | प्राणायामजपो नाम तृतीयः | ४९ |
| ४ | मन्त्रप्रस्तारनिर्णयो नाम चतुर्थः | ५५ |
| ५ | स्नानभेदनिर्णयो नाम पञ्चमः | ५९ |
| ६ | दीपेशादिविनिर्णयो नाम षष्ठः | ६५ |
| ७ | देशव्यवस्थानियमो नाम सप्तमः | ७१ |
| ८ | पञ्चप्रस्थकथनं नामाष्टमः | ७३ |
| ९ | लतासाधनं नाम नवमः | ७६ |
| १० | अज्ञातदुर्निमित्तं नाम दशमः | ७९ |
| ११ | महाकालमन्त्रविधिर्नामैकादशः | ९७ |
| १२ | कालीनित्या नाम द्वादशः | १०१ |
| १३ | कुल्लानित्याविधिर्नाम त्रयोदशः | १०५ |
| १४ | विरोधिनीविधिर्नाम चतुर्दशः | ११० |
| १५ | उग्रप्रभानित्याविधिर्नाम पञ्चदशः | ११५ |
| १६ | दीप्तानित्याविधिर्नाम षोडशः | १२० |
| १७ | मुद्रानित्याविधिर्नाम सप्तदशः | १२६ |
| १८ | मितानित्याविधिर्नामाष्टादशः | १३१ |
| १९ | तिरस्करणिकाविधिर्नामैकोनविंशः | १३७ |
| २० | पथिषद्रुविधिर्नाम विंशतितमः | १४१ |
| २१ | धूमावतीकौतुकसंक्षेपविधिर्नामैकविंशतितमः | १४६ |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शक्तिन्यासपरो मंत्री देवरूपो न संशयः ।
ततः पराधिकारी स्यात्तन्न्यासात्तदनन्तरम् ॥ ९ ॥

पराप्रासादिके न्यासे अधिकारस्तदुत्तरम् ।
प्रासादपरया चाथ ततश्चरणदीक्षणम् ॥ १० ॥

निर्वाणचरणाद्यां वै[1] ततः शाम्भव एव तु ।
निर्वाणचरणाद्यं वै शाम्भवोत्तरमीरितम् ॥ ११ ॥

बालायामधिकारी चेद्बालोक्तान्विन्यसेद्बुधः ।
पंचदश्यधिकारी चेत्पंचदश्यधिकं चरेत् ॥ १२ ॥

विद्यान्यासोत्तरं देवि उत्कीलनमथाचरेत् ।
दीपिनीन्यसनं[2] कृत्वा ततः कुल्लुकचिन्तनम् ॥ १३ ॥

षोडशीदीक्षायुक्तश्चेत्[3] महाषोढादिकं चरेत् ।
परादीक्षणयुक्तश्चेत् षडधारादिकान् न्यसेत् ॥ १४ ॥

पराप्रासादयुक्तश्चेत्तत्तन्न्यासान् समाचरेत् ।
प्रासादपरायुक्तश्चेत्तानेव विन्यसेद्बुधः ॥ १५ ॥

चतुश्चरणदीक्षा तु पराप्रासादगोचरा ।
उभयोर्नहि भेदोऽस्ति किंचिद्भेदोऽस्ति पार्वति ॥ १६ ॥

ततः शाम्भवदीक्षा स्यात् पूजा[4] श्रीचक्रगोचरा ।
सर्वेषां पूजनं कार्य्यं न्यसनं वा[5] विधीयते ॥ १७ ॥

प्रथमं न्यसनं प्रोक्तं ततः पूजा प्रकीर्त्तिता ।
श्रीचक्रे पूजनं कार्य्यं सर्वेषां प्रियवादिनि ॥ १८ ॥

षडाम्नायस्थले देवि षट्शाम्भवमथार्चयेत् ।
षण्णां स्थानं विधायाथ संवर्त्तेशमथार्चयेत्[6] ॥ १९ ॥

सर्वेषां पूजनं कृत्वा चाथ वै[7] कलशं[8] तथा ।
पूजयेद्यत्नतो देवि सर्वसिद्धिमभीप्सुभिः ॥ २० ॥

सर्वदीक्षासमायुक्तः सर्वन्यासान् समाचरेत् ।
षोडशीं तु विना देवि नान्यत्र ह्यधि कारिता ॥ २१ ॥

पराप्रासाददीक्षाद्याः षोडश्युत्तरगाः क्रियाः ।
तत्तत्त[10]न्त्रोक्तविधिना तत्तद्दी[11]क्षादिभिर्युतः ॥ २२ ॥

तत्तत्कर्म[12] प्रकुर्वीत नान्यथा शांकरं वचः ।
या चरणदीक्षा संप्रोक्ता परा सैव प्रकीर्त्तिता ॥ २३ ॥

---

1. B °द्यास्तं । 2. C °न्यासकं । 3. B °वान्; C युक्तश्चेत् षोडशी दीक्षा । 4. C पुनः । 5. B च । 6. C. omits this line. 7. C चाप्य वै । 8. B कृतमं । 9. C हृदि । 10. C तत्र त° । 11. CN तत्र दी° । 12. B क्रमं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीविद्यां तु विहायाथ नाधिकार[1]स्त्वमिष्यते ।
श्रीविद्यायां[1] तुं संपूर्णः सर्वमार्गी भवेत् प्रिये ॥ २४ ॥

श्रीचक्रलेखनं कृत्वा त्रिकोणं बिन्दुमध्यगम् ।
ततो वृत्तं समालिख्य चतु[3]र्दलमनन्तरम् ॥ २५ ॥

चतुःपंचार[4]मालिख्य चतुरस्त्रात्मकं ततः ।
षट्त्रिंशत्तत्त्वरूपं तु विग्रहं विलिखेत्ततः ॥ २६ ॥

एवं तु विग्रहं भाव्यं भावनैव तु लेखनम् ।
प्रासादपूर्वा तु परा प्रोक्ता श्रीतत्त्वविग्रहा ॥ २७ ॥

श्रीमहाषोडशी विद्या मंत्रविग्रहरूपिणी ।
वृत्तस्य परितो देवि पारंपर्य्यक्रमं यजेत् ॥ २८ ॥

पराप्रासादविद्यायाः क्रमः प्रोक्तो महेश्वरि ।
मुख्यं क्रमं प्रवक्ष्यामि शृणु यत्नेन सांप्रतम् ॥ २९ ॥

बिन्दूपरि विभाव्याथ ततो ह्य[5]ष्टदलं शुभम् ।
षट्त्रिंश[6]द्दलसंख्याकं कमलं[7] तु ततो लिखेत् ॥ ३० ॥

अष्टत्रिंशद्दलं चैव तद्बहिर्विलिखेच्छिवे ।
कमलं[8] भुवनाख्यं तु तद्बहिर्विलिखेच्छिवे ॥ ३१ ॥

पंचाशद्दलसंख्याकं चन्द्रसंख्यासमन्वितम् ।
एवं विलिख्य विधिवत् तत्र ध्यायेत् पराम्बिकाम् ॥ ३२ ॥

एवं[9] पूर्वं[10] विभाव्याऽथ षट्त्रिंशत्तत्त्वविग्रहाम् ।
पराप्रासादविद्यां तु षट्त्रिंशत्तत्त्वविग्रहाम् ॥ ३३ ॥

शाम्भवे लेखनं यंत्रं तत्र वै भावना मता ।
बाह्यतः[11] पूजनं कृत्वा ततो ध्यात्वा पराम्बिकाम् ॥ ३४ ॥

अधिकारे समापन्ने परापूजादिके विधौ ।
षट्शाम्भवे महेशानि ह्यधिकारस्ततो भवेत् ॥ ३५ ॥

षट्शाम्भवो महेशानि सर्वोत्तर इतीरितः ।
षोडश्युत्तरगा[12] दीक्षा कार्य्या वा त्विय[13]मेव वा ॥ ३६ ॥

एवं दीक्षादिभिर्युक्तैः किं जप्यं परमेश्वरि ।
भक्तिर्यस्य यत्र भवेत्तेन जप्यं तदेव तु ॥ ३७ ॥

संप्रदायानुसारेण भक्तियोगवशेन तु ।
षोडशी शक्ति[14]दीक्षा स्याद्द्वितीयमुच्यते शृणु ॥ ३८ ॥

---

1. CN °रि° । 2. N °विद्यया । 3. N धनु° । 4. C °स° । 5. C त्व° । 6. B षड्विंश° । 7. B °कलासं । 8. CN °ले । 9. B omits. 10. CN omit. 11. BC °तो । 12. C °का । 13. N त्वय°; C नियत° । 14. CN शाक्त° ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पराप्रासादविद्या तु शिवश[1]क्तिमयी परा ।
अर्द्धनारीश्वरः प्रोक्तः सर्वतंत्रेषु गोपितः ॥ ३९ ॥
इत्येतदुक्तं[2] देवेशि किमन्यत् श्रोतुमिच्छसि ।

श्रीशिव[3] उवाच ।

किं जप्यमिति शंका ते या जाता[4] परमेश्वरि ॥ ४० ॥
सै[5]षोच्यते महेशानि शृणु यत्नेन सांप्रतम् ।
श्रीचक्रे[6] सर्वदेवानां निवेश नमुदीरितम् ॥ ४१ ॥
महाश्रीचक्रराज्ञीयं महाश्रीषोडशी परा ।
पराप्रासादविद्या तु महाश्रीचक्रनायिका ॥ ४२ ॥
उर्ध्वाम्नायादिदीक्षा तु पराप्रासादगोचरा ।
पराप्रासादविद्यायाः श्रीचक्रे विनिवेश[8]नम् ॥ ४३ ॥
षट्शाम्भवेशविद्यायाः श्रीचक्रे विनिवेश[9]नम् ।
बिन्दुचक्रे महेशानि पूजनं शृणु सादरम् ॥ ४४ ॥
बिन्दुचक्रे तु नैर्ऋत्यां मानसं पूजयेच्छिवे ।
बिन्दुवायव्यतो देवि नात्र सम्पूजयेच्छिवे ॥ ४५ ॥
बिन्दुचक्रस्य पूर्वे वै मारुतं पू[10]जयेत् प्रिये ।
बिन्दुचक्रस्य चाग्नेय्यां तैजसं पूजयेच्छिवे ॥ ४६ ॥
बिन्दुचक्रस्य वारुण्यामाप्यं[11] शाम्भवमर्चयेत्[12] ।
बिन्दुचक्रस्य चै[13]शान्यां पार्थिवं पूजयेत्ततः ॥ ४७ ॥
सरश्मिकान् समभ्यर्च्य यथोक्तेन तु वर्त्मना ।
षट्त्रिं[14]शच्चक्रगे देहे[15] न्यसनं कारयेत् प्रिये ॥ ४८ ॥
इत्येतत् कथितं देवि [16]ह्यथवा नवमण्डले ।
नवात्मकं मंडलं वै मुख्यमेव प्रकीर्तितम् ॥ ४९ ॥
नवचक्रात्मकं देवि महासंवर्त्तकेश्वरम् ।
पूजयेद्यत्नतो देवि प्रोक्तं संक्षेपतः प्रिये ॥ ५० ॥
प्रातःकृत्यादि सध्यान[17]पूजनादि क्रिया[18]दिकम् ।
श्रीमत्पञ्चकतंत्रेषु विस्तरेण प्रकाशितम् ॥ ५१ ॥
षट्शाम्भवाख्यं यंत्रं तु नवात्मकमितीरितम् ।
तस्मिन् यंत्रे मुख्यपूजा कथिता परमेश्वरि ॥ ५२ ॥
पंचप्रेतास्तु श्रीचक्रे षट्प्रेताः शाम्भवे मताः ।
सप्तप्रेता गुह्यकाल्यां कथ्यन्ते शृणु सांप्रतम् ॥ ५३ ॥

1. C °भ° । 2. C °क्ते । 3. CN °संवर्त्तकेश्वर° । 4. C याजना । 5. C शै° । 6. B °क्रं । 7. CN °द° । 8. CN °द° । 9. CN °द° । 10. C °तेन । 11. N अथ । 12. C मेव तत् । 13. B वै° । 14. C °ड्विं° । 15. CN देवि । 16. C omits from here to देवि in the fourth line. 17. CN सायान्तः । 18. C °क्रमा° ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हिरण्यगर्भ इत्याख्यः[1] शाम्भवे परिकीर्तितः[2] ।
इन्द्रभैरवनामानौ गुह्यकाख्यामितीरितौ[3] ॥ ५४ ॥
संघट्टनाख्या मुद्रा वै[4] त्रिविधा परिकीर्तिता ।
करद्वयं तु संयोज्य ह्यधोवक्त्रं[5] सुलक्षणम् ॥ ५५ ॥
नखे नखान् सुसंयोज्य पंचांगुल्यो ह्यधो भवेत् ।
करावित्थं सुसंयोज्य[6] मुद्रा[7] संघट्टनाभिधा[8] ॥ ५६ ॥
पूर्वमुद्रां सु[9]संयोज्य कनिष्ठे विरलीकृते ।
संघट्टनाख्या मुद्रा तु द्वितीया परिकीर्त्तिता ॥ ५७ ॥
अत्रापि पक्षद्वितयं कनिष्ठे भिन्नयोजिते ।
तृतीया जायते मुद्रा चतुर्थी सर्वतोत्तमा ॥ ५८ ॥
अंगुष्ठानामिकामध्ये योन्याकारेण योजयेत् ।
कृत्वा करद्वयस्यैवं ह्यधोवक्त्रं[10] सुशोभनम् ॥ ५९ ॥
तर्ज्जन्यां तर्ज्जनी योज्या कनिष्ठायां कनिष्ठिका ।
तर्ज्जनी द्वे कनिष्ठे द्वे चाग्र[11]तोर्द्ध्वं नियोजयेत्[12] ॥ ६० ॥
संघट्टनाख्या मुद्रेयं जपान्ते[13] सर्वसिद्धिदा ।
[14]चतुश्चरणविद्यायां षट्शाम्भवविधावपि ॥ ६१ ॥
मुख्या प्रोक्ता महादेवि दर्शयेत् यत्नतः शिवे ।
इत्येतद्वदितं देवि किमन्यत् श्रोतुमिच्छसि ॥ ६२ ॥

श्रीशिव उवाच ।

अथातः संप्रवक्ष्यामि पारंपर्य्यक्रमं शिवे ।
पूर्ण[15]दीक्षापरत्वेन विविच्य कथयामि ते ॥ ६३ ॥
साक्षात् परशिवेनादौ शंकरस्तु प्रबोधितः ।
चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यति ॥ ६४ ॥
शिवेन बोधिता[16] देवी देव्या सर्वे[17] प्रबोधिताः[18] ।
ब्रह्मविष्णुशिवाश्चैव ईश्वरेण प्रबोधिताः ॥ ६५ ॥
शिवपारंपर्य्यगतो गुरुः शिवपरंपरा ।
देवी[19]परंपरा देवि काल्युपदेशवर्त्मना ॥ ६६ ॥
अत्रापि शक्तिबाहुल्यं मत[20]संख्या न विद्यते ।
अथानन्दभैरवात्तु देवीमतपरंपरा ॥ ६७ ॥

---

1. CN °ख्यः । 2. CN °तः । 3. CN सप्तमौ परिकीर्त्तितौ । 4. N तु । 5. C °चक्रं । 6. CN मस्तके योजयेद्देवि । 7. N °द्रां । 8. N °धाम् । 9. CN स्तु° । 10. C °चक्रं । 11. CN °मृ° । 12. C °जिते । 13. CN जायते । 14. B omits two lines. 15. C °र्णा° । 16. C °तो । 17. C N °र्व । 18. C N °तं । 19. C दिवा° । 20. B °तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्वोक्त[1]त्रितयं देवि कामराजे तु भिन्नतः ।
आनन्दभैरवमते पंचाशीतिमतक्रमः ॥ ६८ ॥
शिवपारंपर्य्यदीक्षा दक्षिणामूर्त्तितः प्रिये ।
सर्वत्र पारंपर्य्यत्वं त्वथ मध्यां शृणु प्रिये ॥ ६९ ॥
दि[2]व्याद्यौघ[3]त्रयोद्युक्ताः शैवे गाणपचोदिताः ।
अत्रापि[4] मतवाहुल्यं मया वक्तुं न शक्यते ॥ ७० ॥
तंत्रे च[5] दिव्यसिद्धौघौ मानवौघस्तृतीयकः ।
सुन्दर्य्यां श्रीमहाकाल्यां तारायां का[6]लिकामनौ ॥ ७१ ॥
पंचदश्यां लो[7]पिकायां मन्वगस्तिकमंत्रके ।
परायां शैवयुक्तायामाद्यन्त[8]व्युत्क्रमादिके ॥ ७२ ॥
षट्शाम्भवे महेशानि औघत्रयमुदीरितम् ।
सर्वमौघत्रयं प्रोक्तं किमितः[9] श्रोतुमिच्छसि ॥ ७३ ॥
औघात्परंपरा प्रोक्ता दिव्यसिद्धात्मका[10] प्रिये ।
शिवादौघाः समुद्भूतास्त्वौघपूजा[11]परंपरा ॥ ७४ ॥
दक्षमूर्त्या गाणपिकं[12] तथैव [ बटुकादिकम्[13]] ।
अथानन्दभैरवादि तत्सर्वमौघमध्यगम् ॥ ७५ ॥
प्रबभूवुः[14] संप्रदायः ह्येते च परिकीर्तिताः ।
[15]आनन्दभैरवे देवि कोटिभेदाः प्रकीर्त्तिताः ॥ ७६ ॥
आनन्दभैरवाद्या वै ह्याद्ये चान्तर्गताः प्रिये ।
मार्गप्रवर्त्तकत्वात्तु मुख्यत्वं परिकीर्त्तितम् ॥ ७७ ॥
तस्मादृषित्वतां प्राप्ता विरूपाक्षादयः प्रिये ।
सरस्वती लेखनी तु गणेशो लेखको मतः ॥ ७८ ॥
मतं[16] परशिवस्येदं वक्ता देवो महेश्वरः ।
पृथ्वी पत्री[17] महादेवि[18] नाथाः शास्त्रस्य बन्धकाः ॥ ७९ ॥
[19]ब्रह्मास्त्राद्याः शास्त्रपाश्च शरभाद्यास्तु रक्षकाः ।
औघाः प्रवर्त्तका लोके ते पूज्याः सर्वथैव तु ॥ ८० ॥
पारंपर्य्यात्क्रमगता भिन्नभिन्नाः प्रकीर्त्तिताः ।
दिव्या देवान्तिके नित्यं सिद्धा भूमाविहावपि[20] ॥ ८१ ॥
मानवौघा मनुष्येषु औघत्रयमुदीरितम् ।
शिवात् स्वगुरुपर्यंतं ज्ञानं पूजामनुत्तमाम् ॥ ८२ ॥

---

1. C N मूर्त्तौं तु । 2. C N दे° । 3. C यत्र । 4. C N °दि । 5. C N तत्रैव । 6. B बा° । 7. C ले° । 8. C °द्यं न । 9. N °मन्यत् । 10. CN °द्दिका । 11. C °ता । 12. C गणादिकं । 13. MSS कुंपादिकं । 14. CN °वर्तकाः । 15. C omits this line. 16. C एतं । 17. C N कर्त्री । 18. C °व । 19. C omits this line. 20. B भूताविहा देवि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

देवीतः[1] स्व[2]स्वगुर्वन्तं[3] ज्ञानं पूजा परा मता ।
अथानन्दभैरवाख्यं स्वगुर्वंतगतं[4] प्रिये ॥ ८३ ॥
इय[5]मेका महादेवि दक्षिणामूर्त्तिसंमता[6] ।
शृणु यत्नेन देवेशि तत्त्वं[7] स्वगुर्वन्तं[8] प्रिये ॥ ८४ ॥
पूजा प्रोक्ता तूत्तमा तु त्वौघात् गुर्वन्तकं शृणु[9] ।
औघाद् गुर्वन्तकं देवि ज्ञानं[10] पूजा प्रकीर्त्तिता ॥ ८५ ॥
मुख्यं ज्ञानमिदं प्रोक्तं कलौ कुत्रापि तिष्ठति ।
देवि पूर्वचतुष्कं तु[11] त्रेतासत्ययुगे मतम् ॥ ८६ ॥
सर्वाभावे महेशानि परमेष्ठ्यन्तकं मतम् ।
चतुष्कं त्वथवा ज्ञेयं नान्यथा सिद्धिरोधकृत् ॥ ८७ ॥
देव्याः स्वगुरुपर्य्यन्तमु[12]पदेशपरंपरा ।
तथा देवेशि सर्वत्र भैरवाद्यं[13] प्रकीर्त्तितम् ॥ ८८ ॥
दक्षिणामूर्तिपादे[14] तु स्वगुर्वंतं[15] प्रपूजयेत् ।
एकविंशत्तमं ज्ञानं गुर्वाख्यं क्रियतां लघु ॥ ८९ ॥
गुरुबाहुल्यभेदास्तु त्वा[16]नंदभैरवे बहु ।
एतज्ज्ञानं विना[17] देवि पापभागी भवेन्नरः ॥ ९० ॥
स्त्रीणां दीक्षा कथं देया तत्र स्त्रीत्वं कथं भवेत् ।
देवीपरंपरोद्दिष्ट[18]स्तूपदेशो यदा भवेत् ॥ ९१ ॥
तदा स्वकीयां सन्दीक्ष्य पुण्यभागी नरो भवेत् ।
सन्न्यासीनां तु दीक्षा तु दक्षिणामूर्त्तिसंमते ॥ ९२ ॥
शिवे चानन्ददेवेषु सर्वत्र दीक्षणं[19] चरेत् ।
शैवे शिवान्तकं नाम वैष्णवे तु तदन्तकम् ॥ ९३ ॥
शाक्ते तु शक्तिगुरवस्तत्र[20] भेदा भवन्ति हि ।
सौरे सौरं गाणपत्ये बौद्धे धर्मान्तिकं भवेत् ॥ ९४ ॥
एवं पाशुपताद्येषु तत्र दीक्षोक्तनाम तु ।
कार्यं तु यत्नतो देवि इत्येवं कालिकाऽब्रवीत् ॥ ९५ ॥
अथवा दक्षिणामूर्तिं पूजयित्वा महेश्वरि ।
तत्सकाशात्प्रदेया स्यात् स्त्रीणां दीक्षा तु सा मता ॥ ९६ ॥
यदि स्त्रीणां बाधिका तु कर्मणः स्यात्तदा[21] कथम् ।
पुत्रद्वारा पोषणीयः[22] पुत्रो नास्ति यदा शिवे ॥ ९७ ॥

---

1. B तत्° । 2. C N °स्तु । 3. C गुर्वं तत् । 4. C N °न्तगं । 5. C पर° । 6. B °मिता । 7. C N °तः । 8. N °न्तकं । 9. B स्वगुर्वन्तं प्रिये । 10. B °तुं । 11. B त्वं । 12. B °न्तं देव्यु° । 13. B °द्ये । 14. B °र्त्युपदेशे । 15. N °न्ते । 16. C °स्त्वा° । 17. C N °दज्ञानतो । 18. B °रादृष्टि° । 19. C सर्वं प्रदक्षिणं । 20. CN° गुर्वन्तं तत्र । 21. B कादिमता कर्म तस्याभिधा; N तस्मात्तदा । 22. B घोषणाय ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्वं कार्य्या लाक्षरे[1] वै ततः सन्दीक्षयेत्तु ताम्[2] ।
अथान्यत्[3] संप्रवक्ष्यामि पूर्वोक्तं तच्छृणु प्रिये ॥ ९८ ॥
कलौ युगे तु संप्राप्ते करिष्यन्ति न केचन ।
उपविद्यां समासाद्य जपि[4]ष्यंति नराधमाः ॥ ९९ ॥
न ते सिद्धिं[5] प्राप्नुवंति ते सर्वे दुःखभागिनः ।
तेषां निन्दा[6] कलौ देवि भविष्यति न संशयः ॥ १०० ॥
काली तारा छिन्नमस्ता सुन्दरी बगलामुखी ।
मातंगी भुवना लक्ष्मीर्धूम्रा त्रिपुरभैरवी ॥ १०१ ॥
एता एव[7] महाविद्या सिद्धविद्या युगान्तरात्[8] ।
विद्यात्वं तु महादेवि तत्तद्युगवशेन तु ॥ १०२ ॥
गुरुसंततिहीनत्वादुप[9]विद्याप्रयोजनात् ।
दुराचारान्निन्दनाच्च न ते[10] वै सिद्धिभागिनः ॥ १०३ ॥
काली तारा छिन्नमस्ता सुन्दरी त्वेकरूपिणी ।
अन्याऽपि च महादेवि एकरूपा न संशयः ॥ १०४ ॥
उपविद्यादिकं चैव दशविद्यामुपाचरेत्[11] ।
सर्वस्वहरणं कृत्वा योगिन्यो भक्षयन्ति तम् ॥ १०५ ॥
अथान्यत्संप्रवक्ष्यामि मतभेदादि[12]वर्णनम् ।
कालीं तारां महाविद्यां दीपिनीं कुलसुन्दरीम् ॥ १०६ ॥
सर्वकालं जपेद्विद्वान् यदि[13] सिद्धिमभीप्सति ।
पाशुपतत्रिशूल्याद्या वीरकौलादयः प्रिये ॥ १०७ ॥
अत्रै[14]वान्तर्भविष्यन्ति [15]महाविद्याविधौ शिवे ।
[16]वीरशैवा वीरपूर्ववैष्णवा ये प्रकीर्त्तिताः ॥ १०८ ॥
अत्रैवान्तर्भविष्यन्ति कालीतारादिके मनौ ।
चार्वाकादिप्रभेदास्तु चीनभेदा अमी स्मृताः ॥ १०९ ॥
चार्वाका आर्हता बौद्धा चीन[17]जैनादयः शिवे ।
शाक्यसिंहादि देवेशि देवीपुत्रादिकाः प्रिये ॥ ११० ॥
अत्रैवा[18]न्तर्भविष्यन्ति महातारामनौ शिवे ।
अथातः संप्रवक्ष्यामि पूर्णदीक्षाविवेचनम् ॥ १११ ॥
पूर्णाभिषेकदीक्षायां भेदा वै[19] बहवो[20] मताः ।
पराप्रासादविद्या च प्रासादपरया[21]ऽथवा[22] ॥ ११२ ॥

---

1. B °रो । 2. B संक्षेपतो तु तौ । 3. B °न्या । 4. CN यजि° । 5. B रति° । 6. B विद्या । 7. B एवमेव । 8. B °गोत्तरं । 9. N °युग° । 10. B °भिहननाच्च ते । 11. N °सु स्वोच्चरेत्; C °मुत्तरो भवेत् । 12. C °श्च । 13. C °स्य । 14. B भैर° । 15. B omits महाविद्या°.....°भविष्यन्ति in the third line. 16. C repeats two lines. 17. B °धीत° । 18. B चार्वाका° । 19. B °श्च । 20. B बहुलो । 21. N °मा । 22. B यथा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बिन्दुयुक्तो भवेच्छैवे सर्गी[1] कामकलात्मिका[2] ।
प्रासादपररूपायां बिन्दुसर्गात्मकं तथा ॥ ११३ ॥
परा दीक्षा तथान्या वै तत्त्वादि[3]बिन्दुसर्गतः ।
अथ षट्शाम्भवी दीक्षा बहुधा परिकीर्त्तिता ॥ ११४ ॥
गर्भशाम्भवकं चापि केरल[4]शाम्भवं च वा ।
केर[5]ले बहवो भेदास्तांश्चा[6]त्र कथ्यतेऽधुना ॥ ११५ ॥
षडन्वयः पंच वापि चतुरन्व[7]यमेव वा ।
त्रितयं वापि देवेशि ह्यभावे एकमेव वा ॥ ११६ ॥
शिवरश्मिः शक्तिरश्मिः शिवशक्त्यात्मका यदा ।
त्रिपुरा दशपंचाढ्यमालोक्ता रश्मयः परा ॥ ११७ ॥
किं वा षडन्वयाढ्येषु[9] प्रोक्ता वै रश्मयः पराः ।
किं वा चरणदीक्षा स्याच्चतुश्चरणरूपिणी ॥ ११८ ॥
रक्तशुक्लमिश्ररूपं निर्वाणं तु तुरीयकम् ।
चरणत्रयदीक्षा स्यान्निर्वाणं सर्वतोत्तमम् ॥ ११९ ॥
निर्वाणात्तु परं देवि नास्ति ज्ञानं तु मा[10]मके ।
षोडश्यां पूर्णदीक्षा तु सं[11]प्रदायपरो चरेत् ॥ १२० ॥
सं[12]प्रदायानुसारेण तत्तन्मं[13]त्रेषु पश्यताम्[14] ।
षडन्वयस्तु देवेशि गुह्यकाल्यामपि स्मृतः ॥ १२१ ॥
पूर्णाभिषेकदीक्षा तु काल्यां च परिकीर्त्तिता ।
एवं सर्वासु विद्यासु पूर्णदीक्षा प्रकीर्त्तिता ॥ १२२ ॥
श्रीसुंदर्य्यां तथा काल्यां मुख्या तु परिकीर्तिता ।
संप्रदायानुसारेण तत्तदर्चनमाचरेत्[15] ॥ १२३ ॥
पंचदश्यामपि शिवे पूर्णदीक्षा प्रकीर्तिता ।
मन्वगस्तलोपिकायां नामदानं तु भिन्नतः ॥ १२४ ॥
संप्रदायानुसारेण नाम देयं महेश्वरि ।
श्रीमद्दक्षिणकाल्यां तु काली[16] गुरूक्तवर्त्मना ॥ १२५ ॥
तारायामपि देवेशि तारा गुरूक्तवर्त्मना ।
यथा काली तथा तारा या तारा सैव कालिका ॥ १२६ ॥
इत्युक्तत्वान्महेशानि तारायामपि दीक्षणम् ।
गुह्यकाल्यां महादेवि षड्रश्मिक्रमतः शिवे ॥ १२७ ॥

1. C संगी । 2. CN °लिका । 3. CN °श्रापि । 4. B केवल्यं । 5. B °व° । 6. C ते चा° । 7. B °द्व° । 8. CN परा । 9. C तु । 10. B व्रा° । 11. B सा° । 12. B सा° । 13. B तन्मं° । 14. B प्रकीर्तितं; C प्रपद्यतां । 15. C तत्तदेव समाचरेत् । 16. B नामदानं ।

२

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दश पंच मालिकाऽत्र गदिता प्रियवादिनि ।
तद्रश्मिक्रमयोगेन नामपूजादिकं मतम् ॥ १२८ ॥
षट्शाम्भवक्रमेणैव नाम देयं महेश्वरि ।
महाकामकला काली राजराजेश्वरी मता ॥ १२९ ॥
अस्यां तु दीक्षा संप्रोक्ता पूर्णदीक्षा शुभा शिवे ।
एतद्गुरूक्तमार्गेण[1] मानवौघक्रमेण तु ॥ १३० ॥
गुरुभक्तस्य[2] शिष्यस्य आज्ञानाम प्रदापयेत् ।
[3]या सा कामकला काली योगपट्टेश्वरी मता ॥ १३१ ॥
योगदीक्षेति सा प्रोक्ता महानिर्वाणरूपिणी[4] ।
हंसकाल्यामपि तथा आज्ञानाम प्रदापयेत् ॥ १३२ ॥
या सा कामकला काली योगपट्टे[5]श्वरी मता ।
पराप्रासादरूपा स्यात्[6] महाकामकला परा ॥ १३३ ॥
चरणदीक्षा हंसकाल्यां चतुश्चरणरूपिणी ।
हंसदीक्षात्परं नास्ति दीक्षा पूर्णाभिषेकिका ॥ १३४ ॥
अथ हंसक्रमेणैव आज्ञानाम प्रदापयेत् ।
अत्रापि देवदेवेशि शिवदेवीपरंपरा ॥ १३५ ॥
भैरवस्या[7]दिनाथस्य देवते कथिते शिवे ।
सर्वेषां तु महादेवि औघपरंपरा[8] मता ॥ १३६ ॥
औघपरंपराज्ञानात् औघे मुख्यत्वमेव तत्[9] ।
शिवाद्या[10] देवदेवेशि विरूपाक्षपरंपरा ॥ १३७ ॥
आदिनाथाद् गुरुज्ञानं स्वगुर्वन्तं महेश्वरि ।
आदौ सर्वत्र देवेशि मन्त्रदः प्रथमो[11] गुरुः ॥ १३८ ॥
परम्परा[12]दिका देवि महेशा एव नान्यथा ।
आनन्दनाथसंज्ञा[13]न्ता गुरवः परिकीर्त्तिताः ॥ १३९ ॥
[14]स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ।
आदौ श्रीस्वगुरुं पूज्य शिवान्तं पूजयेच्छिवे ॥ १४० ॥
एवं देवि दीक्षणादौ पूर्ववत् परिकीर्त्तितम् ।
आनन्दभैरवाद्येषु ह्येवमेव प्रकीर्तितम् ॥ १४१ ॥
स्वगुर्वादि समारभ्य दिव्यान्तं पूजयेच्छिवे ।
अथ कालीदीक्षणादौ आज्ञानाम प्रदापयेत्[15] ॥ १४२ ॥

---

1. C °दुक्तक्रमेणैव । 2. B °णां तुल्य° । 3. CN omit this line. 4. N °दायिनी । 5. B °दे° । 6. B °पस्य । 7. N °स्य चा° । 8. C पारंपरं । 9. CN तु । 10. CN छिन्नायां । 11. C °मदो । 12. CN °मेष्टया° । 13. C °नामा°; N °शब्दा° । 14. This line is omitted in B. 15. CN °पूजनं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रकारान्त[1]रतो देवि गद्यते शृणु साम्प्रतम्।
प्रह्लादानन्द[2]मारभ्य बोधा[3]नन्दान्तिकं[4] प्रिये ॥ १४३ ॥
एतद् गुरुक्रमार्गे[5]ण चाज्ञानाम प्रदापयेत्।
तारायामपि संप्रोक्तः [6]संक्षेपेण मया तव ॥ १४४ ॥

श्रीशिव उवाच।

अथान्यत् संप्रवक्ष्यामि सम्प्रदायस्वरूपकम्।
आदौ हि वैदिकः प्रोक्तस्ततो हि वैष्णवः परः ॥ १४५ ॥
ततो गाणपतं प्रोक्तं ततः सौरं प्रकीर्त्तितम्।
सौराच्छ्रेष्ठं शैवशास्त्रं[7] शैवाच्छा[8]क्तं महेश्वरि ॥ १४६ ॥
शाक्ताद्वामं महेशानि श्रेष्ठेति परिकीर्त्तितम्।
वामात्तु दक्षिणः श्रेष्ठो दक्षिणाद्वीर एव तु ॥ १४७ ॥
अथ वीराच्चावधूतः कौलपूर्वं प्रकीर्त्तितः।
अवधूताद्दिव्यमार्गो दिव्याच्छ्रेष्ठो न विद्यते ॥ १४८ ॥
शैवे[9] चान्तर्भविष्यन्ति श्रीमत्पाशुपतादयः।
पाञ्चरात्रादयो देवि वैष्णवे सम्भवन्ति हि ॥ १४९ ॥
शाक्ते चान्तर्भविष्यन्ति पाषण्डचीनसम्मताः।
कापालिके रुद्रभेदाः कौले चाष्टौ प्रकीर्त्तिताः ॥ १५० ॥
वीरे पंचमतं देवि चीने शतद्वयं मतम्।
बौद्धानां शतभेदाः स्युः सप्त पाशुपते[10] मताः ॥ १५१ ॥
दिव्ये भेदद्वयं देवि पशवस्त्रि[11]विधा मताः।
अवधूते सप्तभेदाः सम्प्रदायक्रमेण तु ॥ १५२ ॥
आनन्दः प्रथमः प्रोक्तो द्वितीयो नाथ एव तु।
मुख्यस्त्वानन्दनाथः स्यात् प्रकाशस्तदनन्तरम् ॥ १५३ ॥
स्वरूपस्तु[12] ततः प्रोक्तश्चैतन्यस्तु तदुत्तरम्।
आराध्याचार्यकश्चैव[13] विद्याधिक्यात् प्रकीर्त्तितः[14] ॥ १५४ ॥
षट्शाम्भवादिशास्त्रज्ञस्त्वाराध्यः परिकीर्त्तितः।
'गु'शब्दस्त्वन्धकारस्त्वाद्[15] 'रु'शब्दस्तस्य बोधकः ॥ १५५ ॥
द्वाभ्यां गुरुश्च सम्प्रोक्तः स एव हि प्रकाशकः।
नाथः सिद्ध्यादिभिर्युक्तस्त्वानन्दः शम्भुशक्तिमान् ॥ १५६ ॥

---

1. B पूजाप्रका°। 2. C °न्तं स°। 3. B विद्या°। 4. C °ङ्कितं। 5. C °त्रे°। 6. B omits from संक्षेपेण......प्रोक्त° in the fourth line. 7. B °क्तं। 8. C शैवशा°। 9. CN शाक्ते। 10. B संप्रदायाय ते। 11. B °वो वि°। 12. B °श्च। 13. CN °कौ चैव। 14. CN °तौ। 15. B गुरुशब्दस्तु गकारादगु°।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आनन्दनाथशब्दस्तु परशैवस्य वाचकः ।
महावीरस्तु [1]यः प्रोक्तः स माहेश्वर इतीरितः ॥ १५७ ॥
वीरस्तूद्धतवत् प्रायः कलौ तिष्ठति कुत्रचित् ।
विलाससम्प्रदायस्तु तद्भेदः केरलो मतः ॥ १५८ ॥
तद्भेदो द्रविडः प्रोक्त आचार्यत्वप्रदाय[2]कः ।
स्वाराज्ये[3] नियतः[4] प्रोक्तश्चैतन्याख्यः स एव तु ॥ १५९ ॥
द्रविडेऽन्तर्भविष्यन्ति स्वामि[5]सम्प्रदायवाचकाः ।
गौडः स्वरूप इत्युक्तस्त्वानन्दाख्यः स एव तु ॥ १६० ॥
केरले बहवो[6] भेदास्तानहं वच्मि संशृणु ।
भवसिद्धो हराख्यस्तु सिद्धाख्यः परिकीर्त्तितः ॥ १६१ ॥
देशपर्य्यायभेदेन कलहट्ट[7]चतुष्टयम् ।
मंत्रपर्य्यायभेदेन विधि[8]सिद्धि[9]स्ततः क्रमः[10] ॥ १६२ ॥
कालपर्य्यायभेदेन सिद्धानन्दमत[11]क्रमः ।
कलहट्टो गोमुखश्च विज्ञानी तदनंतरम् ॥ १६३ ॥
द्रविडराजो महेशानि उत्पादाख्य[12]स्ततः परम् ।
कालपर्य्यायभेदेन संप्रदायक्रमो मतः ॥ १६४ ॥
पूर्वकेरलमादौ स्यात् द्वितीयं तूत्तरं भवेत् ।
अत्रापि नामबाहुल्यं सम्प्रदायानुसारतः ॥ १६५ ॥
दिव्यः सिद्धस्ततः सत्यश्चैतन्यश्चिद्घनः परम् ।
सर्वज्ञाख्यो ब्रह्मविष्णुरुद्रसंज्ञाधरः शिवे ॥ १६६ ॥
आदिसंज्ञा[13] ततो देवि योजनीया सरस्वती ।
आदौ दिव्यादयः शब्दा[14]स्ततो देवी सरस्वती ॥ १६७ ॥
आदौ क्रमास्तु विज्ञेयाः[15] सम्प्रदायस्तदुत्तरम् ।
ततो नामादिकं ज्ञात्वा चाज्ञापदं महेश्वरि ॥ १६८ ॥
अथ द्रविडभेदान् हि शृणु वक्ष्ये यथाक्रमम् ।
अद्वैताख्यः पूर्णनाथश्चिदम्बाख्यस्तृतीयकः ॥ १६९ ॥
अद्वैताख्यः संप्रदायस्त्ववधूतमतेऽपि च ।
सरस्वत्यन्तगो[16] वापि[17] चानन्दान्तोऽपि वा प्रिये ॥ १७० ॥
नाथान्तो वा महेशानि त्रितयं त्रितयं त्रिषु ।
ईशाख्यस्तु महेशानि केरलान्तर्गतो भवेत् ॥ १७१ ॥

---

1. B omits यः प्रोक्त .....सम्प्रदायस्तु in the third line. 2. B °काश° । 3. C स्वराज्ये° । 4. B °तिचयः । 5. B प्राप्ति° । 6. B °हुशो । 7. B कलं हृतृ°; C कलहं च । 8. B °द्धि । 9. तत्सिद्धि । 10. B तत्क्रमात् । 11. B °न्तोदय°; C सम्प्रदाय° । 12. N बालवाख्य° । 13. B संज्ञी । 14. B वश्या° । 15. CN °मात् सुविज्ञाय । 16. C °तो । 17. N देवि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

